| | | | |
|---|---|---|---|
| पर्तव्यम्, | पारयितव्यम् | पुपूर्षितव्यम्, | पेप्रीयितव्यम्; |
| परणीयम्, | पारणीयम्, | पुपूर्षणीयम्, | पेप्रीयणीयम्; |
| [1]पार्यम्, | पार्यम्, | पुपूर्ष्यम्, | पेप्रीय्यम्; |
| ईषत्परः-दुष्परः-सुपरः; | — | — | — |
| [2]व्याप्रियमाणः, | पार्यमाणः, | पुपूर्ष्यमाणः, | पेप्रीय्यमाणः; |
| व्यापारः, | पारः, | पुपूर्षः, | पेप्रीयः; |
| पर्तुम्, | पारयितुम्, | पुपूर्षितुम्, | पेप्रीयितुम्; |
| व्यापृतिः, | पारणा, | पुपूर्षा-पिपारयिषा, | पेप्रीया; |
| परणम्, | पारणम्, | पुपूर्षणम्, | पेप्रीयणम्; |
| पृत्वा, | पारयित्वा, | पुपूर्षित्वा, | पेप्रीयित्वा; |
| व्यापृत्य, | व्यापार्य, | व्यापुपूर्ष्य, | प्रपेप्रीय्य; |
| पारम् २, पृत्वा २, | पारम् २, पारयित्वा २, | पुपूर्षम् २, पुपूर्षित्वा २, | पेप्रीयम् २; पेप्रीयित्वा २. |

(1045) "पृ प्रीतौ" (V-स्वादिः-1258. अक. अनि. पर.)

'प्रीतौ पृणोत्यृदन्तस्य, व्यायामे प्रियते पृङः।' (श्लो. 34) इति देवः।

अयं धातुश्छान्दस इति क्षीरस्वामिकाश्यपौ।

पारकः-रिका, पारकः-रिका, पुपूर्षकः-र्षिका, पेप्रीयकः-यिका; इत्यादीनि सर्वाण्यपि रूपाणि जौहोत्यादिकपिपर्तिवत् (1044) ज्ञेयानि। शतरि—[3]पृण्वन्-ती, इति रूपमिति विशेषः।

(1046) "पृङ् व्यायामे" (VI-तुदादिः-1402. अक. अनि. आत्म.)

'व्यायामः=उद्योगः। स च प्रवृत्तिमात्रम्।' इति धा. का. (2-83)।

'प्रीतौ पृणोत्यृदन्तस्य, व्यायामे प्रियते पृङः।' (श्लो. 34) इति देवः।

प्रायेणायम् 'वि, आङ्' इत्युपसर्गद्वयपूर्वकः।

पारकः-रिका, पारकः-रिका, पुपूर्षकः-र्षिका, पेप्रीयकः-यिका;

---

1. 'ऋहलोः—' (3-1-124) इति भावकर्मणोर्ण्यत्प्रत्ययः।
2. यकि, 'रिङ् शयग्लिङ्क्षु' (7-4-28) इति रिङादेशः।
3. 'स्वादिभ्यः—' (3-1-73) इति श्नुः विकरणप्रत्ययः। 'हुश्नुवोः सार्वधातुके' (6-4-87) इति यण्। णत्वम्।